International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2022; 7(2): 23-32
© 2022 Jyotish
www.jyotishajournal.com
Received: 16-05-2022
Accepted: 20-06-2022

**Ishwar Bhat**
Professor, Former Controller of Examination, CSU
Head, Department of Jyotish, Central Sanskrit University, Jaipur Campus, Triveni Nagar, Jaipur, Rajasthan, India

**Correspondence**
**Ishwar Bhat**
Professor, Former Controller of Examination, CSU
Head, Department of Jyotish, Central Sanskrit University, Jaipur Campus, Triveni Nagar, Jaipur, Rajasthan, India

# असाध्यरोगाणां लक्षणानि तेषां परिहारोपायश्च

**Ishwar Bhat**

## प्रस्तावना

ग्रहनक्षत्रादीनां गतिस्वरूपनिर्णायकमिदं ज्योति:शास्त्रं षट्सु वेदाङ्गेष्वन्तर्भूतं होरागणितसंहिताश्चेति त्रिधा विभक्तमपि लोकानां शुभाशुभफलप्रदर्शने परमोत्कर्षभूतम्। जगतः शुभाशभनिरूपणे प्रवृत्तमिदं शास्त्रं कथं मानवस्य आरोग्यविषयं निरूपयति, कः तावत् चिकित्साशास्त्रेण सह अस्य प्रतिपाद्यप्रतिपादकभावसम्बन्धः इत्यस्मिन् विषये जिज्ञासा अवश्यम् उदेति । यतो हि रोग-आरोग्ययोः विषय: वैद्यशास्त्रज्ञानां कृते आरक्षितोऽस्ति । एवं सति ज्यौतिषं यथा मनश्शास्त्रं चिकित्साशास्त्रे यादृशं स्थानं प्राप्नोति किं तादृशमेव स्थानं इदं शास्त्रं भजति उत न वेति चेत् उच्यते। चिकित्साशास्त्रे मनश्शास्त्रवत् प्रत्यक्षं दृश्यफलंज्यौतिषस्याऽपि अस्ति एव। 'दृष्टे सम्भवति अदृष्टफलकल्पना न न्याय्येति' दृष्टार्थताप्यस्य शास्त्रस्य। अत: मानवस्य आरोग्यविषये दृष्टरूपफलप्रदायकस्य ज्यौतिषस्य उपादेयताम् अत्र प्रस्तौमि –

यथा चिकित्साशास्त्रस्य कृते शरीरविज्ञानमेव आधारमस्ति तथैव ज्यौतिषे द्वादशस्थानेभ्यः अङ्गप्रविभागं परिकल्प्य तत्तद् अङ्गस्योपरि कस्य ग्रहस्य राशेर्वा आधिपत्यमस्तीति परिशील्य ये ये ग्रहाः यस्मिन् स्थाने स्थिताः यस्मिन् राशौ वा स्थिताः तैः सकाशात् कस्य कृते के के रोगा: सम्भवन्तीति विचार्यते जन्मकुण्डल्या: आधारेण । अतो अस्मिन् शास्त्रे कालपुरुषस्य अङ्गान्येव आधारत्वेन गृह्यन्ते । तादृशकालाङ्गेषु कस्याऽपि जातकस्यः रूजां विषये अथवा रुजः निदानार्थं प्राधान्येन षष्ठस्थानं विलोक्यते । तद्यथा-

"तस्करारातिविघ्नादिव्याधयश्च तनुक्षतिः।
मरणं वारिशस्त्रेण चिन्तनीयं हि षष्ठतः॥" इति[1]

अपि चोक्तम् अन्यत्रापि –

“मातुलं मृत्युशङ्कश्च शत्रूश्चैव व्रणादिकान्।
सपत्नीमातरञ्चापि शत्रुस्थानान्निरीक्षयेत्”।। इति।।[2]

यद्यपि सर्वेषां रोगाणां कृते षष्ठस्थानमेव न परिगणयेत् । यतः षष्ठस्थानं किञ्च षष्ठाधिपतिरनयोः दोषराहित्येनापि सर्वदा रोगेण पीड़िताः जनाः दृष्टाः सन्ति बहवः ।

अतः प्रायः रूजः विचारप्रसङ्गे षष्ठस्थानं रोगस्थानम् अस्ति चेदपि सर्वेषां रोगाणां कृते रोगस्थानं पष्ठस्थानमेव नास्ति । उदाहरणार्थं दीर्घावधिं यावत् ये प्रचलिष्यमाणाः रोगाः सन्ति तेषां विषये चतुर्थद्वादशस्थानयोः तीव्रबाधाकारकरूजां कृते षष्ठस्थानं, अनिरीक्षतम् अकल्पिकम् - आकस्मिकं अपघातकमरणसूचकरोगाणां कृते अष्टमस्थानं च परिलक्षयेत् । अपि च कस्याऽपि जनस्य सामान्यरोगस्य स्थिति-गतेर्विषये तनुस्थानं सम्यक् विचिन्तयेत्।

तनुस्थानत: रोगस्य वैशिष्ट्यापेक्षया रोगिणः विषये अधिकं विषयं ज्ञातुं वयं प्रभवामः। लग्नस्थितराशेर्वशात् तत्र स्थितग्रहवशात् लग्नाधिपतेर्वशाच्च पृथक्-पृथक् विषयाः विमृश्यमाणा: सन्ति । जातकस्य नैसर्गिकी जीवनशक्तिः कथमस्ति। रोगिणः प्रतीकारशक्तिस्तावत् कीदृशी अस्ति । जातकस्य वातपित्तकफश्चेति दोषत्रयाणां मध्ये का प्रकृतिः? सात्विकराजसिकतामसिकादिमनोधर्मेषु कः तावत् तस्य मनोधर्मः? कामक्रोधमदमोहमात्सर्यादिषु स्वभावेषु जातकस्य कः स्वभावः? एते सर्वे तनुभावतः अभ्युपगन्तव्याः सन्ति।

अतः यथा षष्ठस्थानमेव रोगस्थानमिति अस्माभिः सर्वत्र घण्टाघोषेण उद्घोष्यते तथैव लग्न-चतुर्थ-अष्टम-द्वादशस्थानान्यपि अवश्यं प्रविचिन्तनीयानि रोगस्य विषये।

## तन्वादिद्वादशभावैर्विचार्यमणाः रूजः

तत्र तन्वादि-द्वादशभावेषु तनुस्थानतः एते रोगाः विचार्यमाणाः सन्ति।

तद्यथा-शिरोरोग-मस्तिष्कावरणदाह-त्वग्रोग-उन्माद-अपस्मार-अर्धाङ्गवायु-दुर्मरण-मुखरोग-रक्तचाप-मलरोगादयश्चेति।

द्वितीयभावेन विमृश्यमाणाः रोगा एते सन्ति। मुखरोग-नेत्ररोग-दन्तरोग-कर्णरोग-घटसर्प-श्वासरोग-छर्दिकादयः।

तृतीयभावेन कर्णरोग-बाहुरोग-निमोनिया-अयोग्य-औषधीनां प्रतिक्रियादयः विचारणीयाः सन्ति।

चतुर्थस्थानात् जलेन दुर्मरणयोगः, वाहनादीनाम् अपघातादयः, हृदयविकारः, स्तनविकारः, कोमा, आत्महत्या, आयोरन्तिमे समये सम्भाव्यमाणाः रोगाः चिन्तनीयाः भवेयुः।

पञ्चमभावात् मंत्र-तंत्र कृत्रिमाभिचारप्रयोगजनितरोगः गर्भस्य किञ्च गर्भकोषविकार-उदरविकार-जलोदर - यकृतविकार - प्लीहविकार - उदरशूल - कागणि - पाण्डु - गर्भपात - मधुमेह - राजयक्ष्म -आम्लपित्त - आमाशयगतव्रण - आन्त्रिकवृणादयो विचार्याः भवन्ति।

षष्ठभावात् तीव्रबाधाकारकाः सर्वे रोगा: अग्निमान्ध-अपचन-अतिसार-गृध्रसिवात-राजयक्ष्म-पाण्डु-आन्त्रिक-सन्निपात-व्रणादयो विचार्या भवन्ति।

सप्तमभावात् प्रमेह्-मूत्रकृच्छ्र-उपदंश-स्त्रीरोगाश्च चिन्तनीयाः।

अष्टमभावतः दुर्मरणानि तीव्रमरणसूचकरोगः, गुदविकारः, अपदंशः विषूचिका, भगन्धरः, पिशारः, आर्तवदोषः, मूलव्याधिः, वृषणवृद्धिः, सर्वे स्त्रीरोगाश्च विचार्यमाणास्सन्ति । नवमस्थानात् सन्धिवात: आमवात: - वातरक्तश्चेति रोगाः विचार्या: -

दशमस्थानात्-सन्धिवातः वातरक्तश्च।

एकादशभावात्-मत्स्यगण्डरोगः।

द्वादशभावात्-पुरातनरोगा:, पक्षाघातादयश्च।

## मेषादिराशिभिर्विचार्यमाणा: रूजः

मेषत: - शिरोरोग - मुखरोग - भ्रम - मद - मोह - उन्माद - निद्रानाश - पित्तदोषप्रधानरोग -अर्धाङ्गवायुप्रभृतयश्च।

वृषत: - कण्ठगतरोग - ध्वनिनाश - तालुस्थानगतरोग - श्वास - अपस्मार - गण्डमाला - तन्द्रा -घटसर्प - मस्तिष्कावरणदाहश्चेति।

मिथुनात् - प्राणवायोर्न्यूनता मज्जातन्तुविकार - श्वासनलिकादोष - निमोनिया - हस्तयोः भञ्जन-रक्तचापश्चेति ।

कर्कत: - वक्षस्थलसम्बन्धिनो रोगाः, उदररोगाः, गर्भकोशस्थरोगाः छर्दी, अन्नरसस्य रोगाः, जलोदररोगाः, अर्बुदः, शस्त्रचिकित्सायाः अनन्तरम् उत्पत्स्यमानपाण्डुरोगः, जलेन आगम्यमाणाः रोगाः, सांसर्गिकरोगाः, कफप्रधानरोगाः, प्रमेह, मूत्र-तन्द्रादयश्च चिन्तनीयाः।

सिंहतः हृदयविकार - श्वासोछ्वासस्य तीव्रता - मूर्छा - तीव्र ज्वर - पृष्ठास्थीनि, पृष्ठसम्बन्धिरोग - रक्तविकारस्वारोग - रक्तचाप - अर्धाङ्गवायु - पक्षाघात - पित्तप्रधानरोग - यकृतरोगाश्चेति।

कन्यात: उदरवेदना-अजीर्ण-अग्निमान्द्य-अतिसार-त्वग्रोगश्चेति।

तुलाराशित: मधुमेहः, प्रमेहः, मूत्ररोगः, बस्तिविकारः, मूत्रावरोधः, कालरा, मुत्रश्मरी, वातवरणजन्यरोगः, वातप्रधानरोगाश्च विचार्यमाणा: सन्ति ।

वृश्चिकात् उपदंश: गनोरिया, आर्तवविकारः, स्त्रीरोगः, हर्निया, वृषणवृद्धिः, मूत्रविकारः, मूलव्याधिः, भगन्धरः, पिशारः, रक्तपित्तः, वीर्यदोषः, योनिविकृतिः, लिङ्गविकृतिः, सांसर्गिकरोगः, कफप्रधानरोगाश्च चिन्त्याः।
धनुतः शिरायु: - स्नायोः विकारः - सन्धिवात: - आमवात्त: धनुर्वात: - जंघापृष्ठशूलः, अपघात: - पित्तप्रधानरोग: - दुर्मरणम् - रक्तचापश्चेति।
मकरात् त्वाग्रोगः - शिरोगतवायु: - आमवात: - क्षुद्रकोष्ठ: - महारोगः - कुष्ठरोग: - हिस्टीरिया -मधुमेहश्चेति।
कुम्भात् रक्तसम्बन्धिनो रोग: - हृदयविकार - पाणिपादशलाकावेदना - ऊरुनलकयोर्वेदना - विषबाधा - मूर्धा - रक्तचाप: - मधुमेहः - प्रमेहः - यकृतदोषः - पाण्डुः कामिणी-वातावरणजन्यरोगश्चेति ।
मीनत: शीतज्वर: - काश: - निमोनिया, सुरापानविकार: (मद्यपानविकारः) - मूत्रविकारः - कफप्रधानरोगश्च ।

**ग्रहैर्विचार्यमाणाः रोगा:**

सूर्येण सर्वप्रकारकज्वरः, पित्तप्रधानरोगः, मस्तिष्कस्योपरि सम्भाव्यमानरोग:, मध्यमवयसि रोगः, हृदयविकारः, नेत्रविकारः, कुब्जः, नेत्रबिन्दुः, रक्तचापः, रक्तपित्तः, रक्तविकारः, दाहः, मूर्छा-शोथश्च चिन्तयेत्।
तदुक्तं यथा –

"पित्तोष्णज्वरतापदेहपतनापस्मारहृत्कोडजव्याधी
न्वक्तिरविदृगार्त्यरिभयं त्वग्गदोषमस्थिस्त्रुतिम्।
काषाग्न्यस्त्रविषार्तिदारतनयव्यापश्चतुष्पाद्भयम्
चोरक्ष्मापतिधर्मदेवफणभृभ्दूतेशभूताद् भयम्॥"[3]

अशुभकर्त्रकसूर्येण विविच्यमानरोगाणां विषये वैद्यनाथोऽप्यभ्यधायि -
तद्यथा –

"सदाग्निरोगज्वरवृद्धिदीपनक्षयातिसारादिकरोगस ङ्कुलम्।
नृपालदेववनिदेवकिङ्करैः करोति चित्तव्यसनं दिवाकरः"।। इति।।[4]

चन्द्रेण संसूचिताः रोगा सन्ति। कफप्रधानरोग: - बालानां रोग: गर्भिणी - स्त्रियाः रोगः, जलोदरः, पाण्डुः, श्वासः, अशक्तता, मनोरोगः, गण्डमाला, गुल्मः, शीतज्वरः, प्रमेहः, मधमेहः, गर्भकोशविकारः, दष्टिदोषः, नासिका रोगः, उन्मादः, उदरविकारः, मस्तकभ्रमणं, मूर्छा, देहे जलसञ्चयः, राजयक्ष्मश्चेति ।।
तद्यथा -

"निद्रालस्य कफातिसारपिटका: शीतज्वरं चन्द्रमाः
शृङ्गब्जाहतिमाग्निमान्द्यकृशता योषिद्व्यथा कामिलाः॥
चेतः शान्तिमस्रग्विकारमुदकाद्भीर्तिं च बालग्रहात् ।
दुर्गाकिन्नरधर्मदैव फणभृद्यक्षाश्च पीडां वदेत्॥"[5]

अशुभकर्त्रकचन्द्रेण परिशीलनीयानां रोगाणां विषये निरूपयति तत्र भवान् वैद्यनाथः।
तद्यथा –

"पाण्डुदोषजलदोषकामलपीनसादिरमणीकृतामयैः।
कालिकासुरसुवासिनीगणैराकुलं च कुरूते चन्द्रमाः"।। इति।।[6]

**कुजेन संसूचिता: रूजः एते सन्ति**

पित्तप्रधानरोगः, आकस्मिको अपघातः, दाहः, ज्वरः, रक्तचापः, रक्तपित्तः, शस्त्रक्रिया, व्रणः, मैली, प्लेगुः, स्नायुविकारः, भगन्धरः, पिशारः, रक्तस्त्रावः, आन्त्रिकव्रणः, पृच्छशोथः, आम्लपित्तः, रक्ताशश्चेति ।
तद्यथा -

"तृष्णास्त्रक्कोपपित्तज्वरमनलविषास्त्रर्तिकुष्ठक्षिरोगान्
गुल्मापस्मारमज्जाविहतिपरुषतावामिका देहभङ्गान्।
भूपारिस्तेन पीडा सहजसुतसुहृद्वैरयुद्धं विद्यत्ते
रक्षो गन्धर्वघोरग्रहभयमवनीसूतुरुर्ध्वाङ्गरोगम्"॥ इति ॥[7]

अशुभकर्त्रककुजेन विचार्यमाणरोगानां विषये वैद्यनाथोऽपि ब्रूते।
तद्यथा -

"पीनबीजकफशास्त्रपावकग्रन्थिरूग्व्रणदरिद्रजामयैः।
वीरशैवगणभैरवादिभिर्भीतिमाशु कुरूते धरासुतः"।। इति।।[8]

बुधेन संसूच्यमाणाः रूजः -

मज्जातन्तोर्विकृतिः, मनोविकारः, चर्मरोगः, कष्ठरोगः, उन्मादः, श्वासोच्छवासक्रियासम्बन्धवशात् सम्भाव्यमाणाः रोगाः, वाचि अस्पष्टता, मूकत्वश्चेति ।

तद्यथा -

"भ्रान्ति दुर्वचनं दृगामयगल-घ्राणोत्थरोगान् ज्वरम्
पित्तश्लेष्मसमीरूजं विषमपि त्वग्दोषपाण्ड्वामयान्।
दुःस्वप्नं च विचर्चिकां निपतनं पारूष्य बन्धश्रमान्
गन्धर्वक्षितिहर्म्य वासिभिरपिज्ञो वक्ति पीड़ां खगैः॥"[9]

यदि बधुश्चेदशुभस्तत्र विश्लेषणीयाः रोगाः इमे सन्ति। तद्यथा -

“गुह्योदरादृश्यसमीरकुष्टमन्दाग्निशुलग्रहणीरूगाद्यैः।
बुधादिविष्णुप्रियदासभूतैरतीवदुःखं शशिजः
करोति”।। इति।।[10]

**गुरुणा संसूच्यमाणाः रोगाः**

अपचन - यकृत् विकार - प्लीह - मधुमेह - प्रमेह - पाण्डु - कामणि - जलोदर - मेधोवृद्धि - रक्तचापश्चेति।

तद्यथा -

गुन्मान्त्रज्वरशोकमोहकफजश्रोत्रार्तिमोहामयान्
देवस्थाननिधि प्रपीड़नमहीदेवेशशापोद्भवम्।
रोगं किन्नरयक्षदेवफणभृद् विद्याधराद्युद्भवम्
जीवः सूचयति स्वयं बुधगुरु कृष्णापचारोद्भवम् ।।
इति।।[11]

यदि दोषकर्त्रकग्रहः गुरूश्चेत् तदा इमे रोगाः विशेषतः तर्कणीयाः सन्ति।
तद्यथा -

“आचार्यदेवगुरूभूसुरशापदोषैः शोकं च
गुल्मरूजमिन्द्रगुरूः करोति”।[12]

**शुक्रेण संसूच्यमाणाः रोगाः**

उपदंश, गनोरिया, आर्तवदोषः, आर्तवविकारः, योनिदोषः, वीर्यदोषः, मूत्रविकारः, स्त्रीरोगः, गर्भकोषविकारः, स्वरविकारः कालरा, मधुमेहः, प्रमेहश्चेति।

तद्यथा -

"पाण्डुश्लेष्मत्मरूत्प्रकोपनयनव्यापत्तितन्द्रीश्रमान्
गुह्यस्यामयमूत्रकृच्छ्रमदनव्यापत्ति शुक्लस्रुतीः।
वासः स्त्रीकृषिदेहकान्तिविहतिं शोफामयं योगिनी
यक्षीमातृगणाद्भयं प्रियसुहृद्भंङ्गं सितः सूचयेत् ॥
इति ॥[13]

दोषकर्त्रकशुक्रग्रहेण चिन्त्यमाणरोगाणं विषये इत्थं वक्ति तत्र भवान् वैद्यनाथोऽपि।
तद्यथा -

“कान्ताविकारजनिमेहरूजा सुराद्यैः
स्वेष्टाङ्गनाजनकृतैर्भयमासुरेज्यः”।। इति।।[14]

**शनिना संसूचिताः रोगाः**

सन्धिवातः, आमवातः, वातरक्तः, पक्षाघातः, धनुर्वातः, जंघापृष्ठमूलम्, वातप्रधान रोगः, बालग्रहः, स्थविरावस्थायां सम्भाव्यमानरोगः, दीर्घकालिकरोगः, श्वासरोगः, कर्णविकारः, दन्तविकारः, अस्थिविकारश्चेति।

तदुक्तं यथा -

"वातश्लेष्मविकारपादविहतीरापत्तितन्द्रीश्रमान्
भ्रान्तिं कुक्षिरूगं तरूष्णभृतकध्वंसं च पश्वाहतिम्।
भार्यापुत्रविपत्तिमङ्गविहृतिं हत्तापमर्कात्मजो
वृक्षाश्मक्षतिमाह कश्मलगणैः पीडां
पिशाचादिभिः॥[15]

दोषकर्त्रकशनिग्रहवशात् जायमानानां रोगाणां विषये निरूपयति वैद्यनाथोऽपि -

“दारिद्रयदोषनिजकर्मपिशाचचौरैः क्लेशं करोति
रविजः सह सन्धिरोगैः”। इति।[16]

**राहुणा संसूचिताः रूजः** - मनोविकारः, मूर्छा, अपस्मारः, क्षुधा, क्रिमिकीटैरूपदंशः सर्प-वृश्चिक-बिड़ाल-शुनक-सिंह-व्याघ्र-जम्बूकादिभिः प्राणिभिः सम्भाव्यमाणदंशः, भूतप्रेतपिशाचबाधावशात् सम्भाव्यमाणरोगः अभिचारक्रियावशाच्च सम्भाव्यमाणः रोगश्चेति ।
तद्यथा -

"स्वर्भानुस्तापकुष्ठविषमव्याधीन् विषं कृत्रिमम्
पादार्तिं च पिशाचपन्नगभयं भार्या तनूजापदम्।

ब्रह्मक्षत्रविरोधशत्रुजभयं केतुस्तु संसूचयेत्
प्रेतोत्थं च गदं विषं च गुलिकः सर्पार्तिमाशौचकम् ॥
इति ॥"[17]

अशुभकर्त्रकराहोः सकाशात् इमे रोगाः विशेषतश्चानुमातव्येति ब्रूते वैद्यनाथोऽपि।
तद्यथा -

"करोत्यपस्मारसूरिरज्जुक्षुदद्‌दृक्कृमिप्रेतपिशाचभूतैः।
उद्बन्धनेनारूचिकुष्टरोगैर्विधुन्तुदश्चातिभयं
नराणाम्"।। इति।।[18]

केतोः सकाशात् विचार्यमाणाः रोगाणां निरूपणं जातकपारिजातकारोऽपि स्पष्टयति -
यथा -

"कण्डूमसूरिरिपुकृत्रिमकर्मरोगैः
स्वाचारहीनलघुतातिगणैश्च केतुः।। इति।।[19]

एवमत्र मया आपाततः स्थानराशिग्रहैर्वशात् विमृश्यमाणानां रोगाणां विषये प्रतिपादितम्।।
प्रसङ्गेऽस्मिन् अन्यः विषयोऽपि रूजां विषये विचार्यमाणोऽस्ति । तदुच्यते-यथा वैद्यकीयशास्त्रे आरोग्यस्य रक्षा किञ्च तस्य पोषणम् एकं विभागम् अपि च रोगस्य निदानम् अथवा रोगस्य निवारणम् आयुश्चिन्तनं प्रथमं विभागमस्ति। द्वितीयं विभागमस्ति रोगिणः रोगनिवारणः विषयकसाध्यासाध्यत्वम्। यदि रोगिणः आयुरेव न स्यात्तर्हि रोगनिवारणस्य प्रश्नमेव नोद्भवति। अत: जातकस्य आयुर्दायमपि सम्यक् विचार्य ततः परमेव रोगनिवारणस्य साध्यासाध्यत्वं चिन्तनीयमस्ति।
सम्प्रति असाध्यरोगाणां नामानि तेषां लक्षणानि क्रमशः वर्ण्यन्ते । असाध्यरोगेषु रक्तचापः, श्वासरोगः, हृद्रोगः, मधुमेहः, अर्बुदप्रभृतयः सन्ति।
असाध्यरोगेषु प्रथमः रोगोऽस्ति रक्तचापः । रक्तचापो नाम रक्तस्य संमर्दः । अस्माकं शरीरे हृदयः रक्तक्षेपणं करोति। तेन निर्मितं रक्तं देहस्य विभिन्नाङ्गेषु संप्रेषयति। यद्यपि इदं कार्यं व्यक्तेः जन्मादारभ्य आमरणं यावत् अनुस्यूततया प्रवर्तमानमस्ति। यदि रक्तस्य संप्रेषणकार्यम् अवरुद्धं भवति तदानीं मृत्युरेव सम्भवति । इदं नलिकामाध्यमेन विशुद्धं रक्तं प्रेषयति । विशुद्धरक्तं नलिकामाध्यमेन यदा प्रवहति तत्समये नलिकायां आकुञ्चनं भवति । प्रसरणक्रियायाः माध्यमेन अग्र अग्रे रक्तः प्रवहति । रक्ते स्थितं आहारद्रव्यं देहे स्थिताः कोषाः प्राप्य अशुद्धरक्तं विशिरायाः माध्यमेन हृदये पुनरायाति एवं अपधमनी अभिधमनीनां माध्यमेन रक्तं यदा प्रवहति तदा रक्तस्य चलनक्रियायां या शक्तिः अथवा सम्मर्दः भवति तदेव रक्तचापः अस्याः। क्रियायाः विकृतिरेव रक्तचापः।

**अस्य रोगस्य कारकग्रहः** हृदयस्य कार्ये या विकृतिः सम्भवति, अस्य रोगस्य लक्षणं तदेव । अत: हृदयरक्तयोरुपरि आधिपत्यं प्राप्यमाणो रविरेव अस्य रोगस्य कारकः। सूर्यानन्तरं कुजमपि अस्य रोगस्य कारकत्वेन विभावयेत् । यतः येषां जनानां कृते अतिशीघ्रं कोप उत्पद्यते तेषां जनानां कृते अस्य रोगस्य बाधा अतिशीघ्रं भविष्यति ।

**कारकस्थानम्:** रोगस्यास्य कारकस्थानं तनुस्थानं किञ्च चतुर्थस्थानम्। जातके चतुर्थस्थानं तनुस्थानं, चतुर्थाधिपतिः लग्नाधिपति: अनयोः दोषैर्विना कस्याऽपि पुरुषस्य कृते अयं रोगो नोत्पद्यते। सिंह-कुम्भ लग्नयोर्मध्ये येषां जन्म अभवत् तेभ्यो अस्य रोगस्य बाधा आधिक्येन भवति। अग्निवायुराशीनां जनेभ्यः अस्य रोगस्य स्थितिः बाहुल्येन वक्तुं शक्या।

**रक्तचापयोगा:**

1. अग्निराशौ विद्यमानौ रविकुजौ लग्नभावे उत चतुर्थभावे यदि स्थितौ भवतः।
2. केन्द्रभावेषु यत्र क्काऽपि एकस्मिन् भावे बहवो पापग्रहा: स्युः।।
3. क्रूरग्रहाणां दृष्टिः लग्ने चतुर्थे वा स्यात्तदा।
4. पुरुषराशेः बहवो ग्रहा: यदि लग्ने चतुर्थे च स्युः।
5. सूर्यकुजौ, रविमन्दौ, शनि-कुजौ, सूर्यकेतू, राहुकुजौ, अनयो: ग्रहयोः युतिः प्रतियोगो वा लग्नचतुर्थयोर्मध्ये यदि स्यात्।
6. सूर्यकुजयोः, रविशन्योः, शनिकुजयोः, रविकेतोः, राहुकुजयोः युतिर्वा प्रतियोगो वा लग्न-सप्तम-चतुर्थ-दशमयोर्मध्ये यदि स्यात्तदा।
7. लग्नेशचतुर्थेशौ यदि दुर्बलौ स्तः।
8. चन्द्रः बलहीनः, लग्न चतुर्थयोर्मध्ये यदि पापग्रहा: स्युः।
9. शनिना अवलोकित: चन्द्र: 1-4-6-8 स्थानेषु यदि स्यात्तदा।
10. चन्द्रः पापग्रहैर्युत: अथवा पापानां मध्ये स्थित्वा यदि लग्न-चतुर्थ-दशमभावेषु तिष्ठति तदा।
11. चन्द्रः, सूर्यः, चतुर्थस्थानं, चतुर्थाधिपतिः, सिंहराशिः, कुम्भराशिः, लग्नाधिपतिश्चेति एषु सप्तसु स्थानेषु यदि चत्वारो दूषिताः स्युः।

12. शनिः अग्निराशौ किञ्च सूर्यः वायुराशौ अथवा जलराशौ वा विद्यमाने सति। एवमत्र प्रतिपादितेषु द्वादश योगेषु यस्मिन् कस्मिन्नपि योगे जातस्य रक्तचापरोगः सम्भवति।

**श्वासरोगः (Asthma)**

श्वासरोगः वयोलिङ्गभेदरहितोऽस्ति। श्वासोच्छवाससमये महतीं पीडामुत्पादयति। अयं रोगः कफवातयोः प्रधानदोषेण सञ्जायते। अतः अस्य कारकग्रहौ चन्द्रशनीं स्तः। चन्द्रशनीं परित्यज्य अस्य रोगस्य अपर: कारकग्रहः बुधः। यतः एषः श्वासच्छवासे विकृतिं जनयति। एतेन सिध्यति यत् शनिबुधचन्द्राणां दोषवशादेव अस्य रोगस्य समुद्भवः भवति।

स्थानदृष्ट्या श्वासनलिकाया स्थानं द्वितीयमस्ति । आमाशयस्य वक्षस्थलस्य च स्थानं चतुर्थमस्ति । अनयोः स्थानयोः स्वामिनौ यदि दूषितौ न स्यातां तदा अयं रोग: नोत्पद्यते।

**श्वासरोगस्य कारकयोगा:**

1. शनिना विलोकित: चन्द्रः लग्न-द्वितीय-चतुर्थ-षष्ठ-अष्टमस्थानेषु यत्र क्वापि स्यात्तदा।
2. शनिचन्द्रयोः समसप्तकः द्वितीयाष्टमस्थाने यदि स्यात्तदा।
3. लग्नात् द्वादशे शनिः द्वितीये च चन्द्रः।
4. लग्नादष्टमे शनिः षष्ठे चन्द्रः।
5. लग्नाच्चतुर्थे चन्द्रः दशमे शनिः।
6. लानात् द्वितीये चन्द्रः रन्ध्रस्थाने च बुधः।
7. चतुर्थे चन्द्र: दशमे च बुधः लग्नात् एतेषु सप्तसु योगेषु जातस्य श्वासयोगो सम्भवति ।

**हृद्रोगः (Heart disease)**

हृदयस्य कृते अतिश्रान्त्या, आघातवशात् बहुचिन्तायाः कारणेन, भीतिवशात्, सन्तापादिमानसिकविकारवशाच्च अयं रोगः सञ्जायते । एतत् अतिरिच्य जलोदर-पाण्डु-रक्तचाप-आमवात-वातरक्त-यकृत-विकारादि रोगैरपि हृद्रोगः सम्भवति।

**अस्य रोगस्य कारकग्रहा:** रोगस्यास्य प्रमुख: कारकग्रहः सूर्यः। यतो हि हृदयरक्तयोरुपरि सूर्यस्यैवप्रभावोऽस्ति । किञ्च सूर्य: दोषरहितो यदि स्यात्तदा अयं रोगः न सम्भवति।

**कारकलग्नानि:** वृषसिंहकन्यामीनलग्नानां जनाः विशिष्य अयं रोगेण पीड़िताः दरीदृश्यन्ते। हृदयस्य विकारो नाम देहे शुद्धरक्तसंग्रहाभावः। यद्वा रक्तसम्प्रसारणक्रियाया अवरोधः। कुम्भराशौ एव विशिष्य रक्तसंप्रसारणस्य गुणधर्मोऽस्ति । अत: जातके कुम्भराशेर्दोषवशादेव हृदयविकारः सम्भवति। कर्क, वृश्चिक, मीन लग्नेषु समुत्पन्नानां जनानां कृतेऽपि अस्य रोगस्य सम्भवः अस्ति।

**स्थानम्:** यदि अस्य रोगस्य सन्दर्भे कारकस्थानं विलोकयामः तदा चतुर्थभावेशः सर्वथोभावेन परिगणनीयः भवति। तदनन्तरं दशमस्थानमपि संगणयेत्। यतः चतर्थस्थानात् सप्तमं दशमभावमस्ति । दशमभावे स्थितानां ग्रहाणां प्रभावः चतुर्थेऽपि भवत्येव। चतुर्थदशमयोरनन्तरम् अष्टमस्थानमपि अवलोकनीयं भवति। यतः हृदयरोगेण ये शीघ्रं मृत्युमवाप्नुवन्ति तेभ्यः अल्पायुर्योगकारकस्थानम् अष्टमस्थानमस्ति । कदाचित् यकृतदोषेणाऽपि हृदयविकारो भवति। अतः पञ्चमस्थानमपि विचारणीयमस्ति। कुत्रचित भयशोकमनस्तापादिमानसिकविकारैः हृदयविकारो सञ्जायते। अत: तनुस्थानमपि अस्य रोगस्य कारकस्थानत्वेन परिगणयेत्। अत: पूर्वोक्तपञ्चस्थानानि, तेषां स्थानानाम् अधिपाः दोषयुक्ताः यदि स्युः तदानीमेव हृदयविकारः सम्भवति।

**राशयः** राशीनां मध्ये पित्तप्रकृतिकराशयः मेषः, सिंहः, धनुः किञ्च मिथुन, तुला, कुम्भराशीनां जनानां कृते अस्य रोगस्य सम्भवः अस्ति।

**हृद्रोगयोगा:**

1. बहवो ग्रहा: चतुर्थे दशमे वा स्थिताः स्युः।
2. पापग्रहा: रविकुजशनिराहवः चतुर्थदशमयोः मध्ये यत्र क्वापि स्थिताः भवेयुः।
3. शनिकुजौ, सूर्यमन्दौ, रविकेतू, शनिचन्द्रौ, एषु ग्रहेषु द्वयोर्ग्रहयोर्युतिः प्रतियोगो वा चतुर्थदशमयोर्मध्ये भवेत्।
4. सूर्यचन्द्रौ लग्न-षष्ठ-अष्टमाधिपतयश्च यदि स्युः निर्बलाः।
5. पापा: षष्टाऽष्टमद्वादशे स्थिताः भवेयुः राशिरपि सिंहो यदि भवेत्तदा।
6. पापानां दृष्टिः चतुर्थे स्यात्तदा।
7. लग्नं मकर: शनि: चतुर्थे वा अष्टमे वा कुजः लग्ने वा पञ्चमे वा दशमे वा स्यात्तदा अथवा लग्ने वृषः षष्टे सूर्य: व्यये च शनि: स्यात्तदा जातस्य हृद्रोगः भविष्यति।
8. मेषकर्कसिंहवृश्चिकराशीनां लग्नं भवेत्। लग्नात् चतुर्थे चन्द्रशनीयुतिर्भवेत् तदा जातकस्य हृदयविकार: वारं-वारं सम्भवति।
9. अथ कुजरविजौ वाक्पतिर्बन्धुसंस्थौ नराणां नियतं शरीरे क्लेशकारी हृद्रोगः स्यात् ।

तद्यथा

"दुष्टैर्वा पीड़ितः सन्नथ कुजरविजौ वाक्पतिर्बन्धुसंस्थो हृद्रोगः स्यान्नराणां व्रण इह नियतं क्लेशकारी शरीरे। पातालस्थो महीजस्तनुनिलयगाः सूर्यवित् सैंहिकेयाः रन्ध्रस्थो भानुपुत्रो यदि जनुषि तदा स्यान्तरो दुःखभागी"॥ इति ।[20]

**मधुमेहः**

एकत्र उपविश्य ये ये जनाः पौष्टिकं पिष्टमयं सुग्रासं भक्षयन्ति तादृशसुखभोगिनां सुखीवर्गस्य जनानां च रोगोऽस्ति अयं रोगः। यथा प्रकृष्टेन मेहनं इति प्रमेहः तद्वत् मधुमेहः । मधुमेहेऽपि सुरामेह - इक्षुमेह - मधुमेहश्चेति विभागत्रयमस्ति। ये च जनाः मानसिकश्रमस्य आधिक्यं वहन्तो सन्ति तेभ्यः महद्भ्यः अस्य रोगस्य उपद्रवः बाहुल्येन दृश्यते।

अस्य रोगस्य कारकग्रहः कः इति वक्तुमेव कष्टम् । वातपित्तकफश्चेति दोषत्रयाणामपि कालुष्यवशात् अयं रोगो जायते । स्नायु-अस्थि-असृक्-त्वक्-शुक्र-वसा-मज्जा च सप्तधातवोऽपि दूषिताः स्थास्यन्ति मधुमेहरोगिणाम्। अतः कारकग्रहः कः इति वक्तुमेव कष्टम्। सप्तधातूनां दोषाणां सत्वेऽपि कफस्य प्राधान्यम् अस्मिन् रोगस्य कृते वक्तव्यमेव । अपि च अस्य रोगस्य प्रमुखं लक्षणमस्ति शरीरस्थितरक्ते तावत् शर्करायाः प्रमाणाधिक्यमेव । किञ्च वारं-वारं मूत्रविसर्जनस्य प्रवृत्तिः जलस्य पिपासा, एभिर्लक्षणैः अस्माभि ऊह्यो भवति यत् चन्द्रगुरुशुक्राः रोगस्यास्य कारकाः।

यतो हि शरीरे शर्कराजनकोग्रहः गुरुः किञ्च यकृद्दोषमुत्पादकग्रहोऽपि गुरुरेव । वारं-वारं मूत्रप्रवृत्तिं कुर्वाणो ग्रहः चन्द्रः। शुक्रः जननेन्द्रियस्य गुह्यस्थानस्य च अधिपतिः।

अतः गुरुचन्द्रशुक्राणां दोषवशादेव अस्य रोगस्य प्रादुर्भावो भवति ।

**रोगस्य कारकलग्नानि**

विशिष्य मूत्रविसर्जनक्रियायाः कारकत्वं वृश्चिकेऽस्ति । येन केनाऽपि कारणेन शरीरे रक्तस्य प्रदूषणक्रियायाः कारकत्वं सिंहकुम्भयोरस्तिः। अतः सिंहवृश्चिककुम्भलग्नोत्पन्नजनानां कृते अयं रोगः विशिष्य सम्भवति ।

**स्थानम्:** स्थानदृष्ट्या अस्माभिः पञ्चमषष्टाऽष्टमस्थानानि अवलोकनीयानि।

**मधुमेहरोगयोगाः**

1. कुम्भलग्ने गुरुशुक्रयोः योगः स्यात्।
2. कुम्भे सूर्यः शुक्रचन्द्रकुजाः क्रमशः पञ्चमषष्टाऽष्टमेषु स्थिताः स्युः।
3. मानसिकाघातवशात् अयं रोगः सम्भवति। अतः यस्य चन्द्रः दूषितोऽस्ति तत्कृते अस्य रोगस्य सम्भवोऽस्ति।
4. तुलालग्ने गुरुः षष्टाऽष्टमे शुक्रमंगलौ अथवा तयोः प्रतियोगः शनिना सह स्यात्तदा।
5. सिंहवृश्चिककुम्भराशिषु यदि अनेके ग्रहाः स्युः।

**अर्बुदरोगः (Cancer) (विद्रधिः)**

**Cancer** कृते आयुर्वेदे अर्बुदरोगः इति नाम । अयं रोगः अत्यन्तं मारकरोगत्वात् वयो-लिङ्ग-देश-ऋतुमानादिभेदैर्विना सर्वान् पीडयति। रोगस्य निदानमपि कष्टसाध्यमेव।

**कारकग्रहः** - अस्य रोगस्य प्रधानं लक्षणमस्ति यत् शरीरस्य मृदुभागे यत्र क्वापि आदौ व्रणोत्पत्तिर्भवति। व्रणमेव पुनः कन्दुकवत् शिलासदृशो भविष्यति। व्रणे तावत् शोथवेदनाकण्डूतितापप्रभृतयो दोषाः भूयो भूयः सम्भवन्ति। पुनः तस्यैव व्रणस्य विस्फोटवशात् दुर्गन्धः आयाति । किञ्च स्पर्शमात्रेण रक्तस्रावोऽपि जायते। अतः एभिर्लक्षणै अस्माभिः कुजशनिचन्द्राः अस्य रोगस्य कारकग्रहाः सन्तीति विभावयेत्।

**स्थानम्:** स्थानदृष्ट्या वयं विचारयामश्चेत् जातके अस्य रोगस्य इदमेव निर्दिष्टकारकस्थानमिति वक्तुं न शक्यते । यतो हि देहे कस्याऽपि अवयवे व्रणः भवितुमर्हति। उदाहरणार्थम्-यकृत्-कण्ठ-जिह्वा-गर्भकोष-गुदद्वार-स्तनद्वय-वक्षस्थानश्चेति बहुषु अवयवेषु व्रणः सञ्जायमानत्वात् अस्य रोगस्य कारकस्थानम् इदमेव इति वक्तुं सर्वथा असम्भवमेव । शरीरे मृदु-अवयवानां असकृत् संघर्षणवशादपि प्रायः व्रणस्य सम्भवो भवत्येव । एतेन अनुमीयते यत् जिह्वा, ग्रीवयोः स्थानं द्वितीयं, वक्षस्थानस्य भावो चतुर्थं, यकृत्-प्लीह-गर्भाशयस्य च स्थानं पञ्चमं, षष्ठस्थानं, गुदस्थानमष्टमं मस्तिष्कस्य स्थानं तनुश्चेति एवं क्रमेण रोगस्य कारकस्थानानि बहूनि भवन्ति।

**लग्नानि:** अस्मिन् अर्बुदरोगे रक्तदोषमेव प्रायः मुख्यकारणत्वात् सिंह-कुम्भलग्नयोर्जना एवं विशिष्य अनेन रोगेण पीड़िताः भवन्ति । कर्क, कन्या, मकर, मीन लग्नस्य जनानां कृतेऽपि अयं रोगबाधा आधिक्येन दृश्यते।

एवमत्र असाध्यरोगाणां लक्षणानि तेषां रोगाणां सम्भावासम्भवयोगाः प्रोक्ताः। उपक्रमेऽस्मिन् तेषां रोगाणां कृते कारणानि किञ्च तेषां परिहारस्य विषये किञ्चिद् उपस्थापयामि।

जन्मान्तरीयपापफलान्येव असाध्यरोगाणां कारणानि सम्भवन्तीति शास्त्रेषु उच्यते -

तद्यथा -

"जन्मान्तरकृतं पापं व्याधिरूपेण जायते।
तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः"॥ इति ॥[21]

पूर्वजन्मनि कृतानि दुष्कर्माणि यानि सन्ति तेषामेव पापस्य फलेन व्याधयः सम्भवन्ति । तेषां व्याधीनां उपशमनार्थम् औषध-दान-जप-होम-देवतार्चनादीन् कारयेत्।
यदि व्याधीनाम् उपशमनं कष्टसाध्यमिति कदाचित् दृश्येत तदानीमपि तत्तद्रोगाणां कृते चिकित्सा-शान्ति-प्रायश्चित्तादयो कर्त्तव्याः भवन्तीति सायणमाधवार्योऽपि ब्रूते-

तदुक्तं यथा -

"प्रायश्चितं दुःश्यमरोगे शमनाय तत्तदुदितमपि।
कार्यं सर्वेष्ववदत् स्वग्रन्थे सायणोऽस्य वचनमिदम्"॥[22]

यथा कार्येषु दृष्टसामग्रयः अदृष्टसामग्रयश्चेति उभयात्मिका सामग्रेरपेक्षा सम्भवति तथैव रूजां शान्तये प्रायश्चित्तं किञ्च औषधम् अनयोर्द्वयोरपि अपेक्षा अस्तीति न विस्मर्तव्यो विषयः।

तद्यथा -

"यथा कार्येषु सामग्री दृष्टादृष्टोभयात्मिका।
तथोक्तरोगनाशेषु प्रायश्चित्तौषधात्मिका"।।इति ॥[23]

भूतावेश-ग्रहगतिदोष-त्रिदोषश्चेति कारणत्रयैर्वशात् रोगोत्पत्तिर्भवति चेदपि स्वपूर्वजन्मार्जितपापसाञ्चयस्य फलमिदम् एकैव कारणं हेतुत्रयेण मानवान् पीडयति।
तद्यथा -

"रोगार्तानामिहतु बहुधा कल्प्यते रोगहेतुः
भूतावेशाद्ग्रहगतिवशाद्वाथ पित्तादिकोपात् ।
एतत् तथ्यं त्रिविधमुचितं प्रायशः स्वीयपापात्
रोगोत्पत्तेर्भवति हि नृणां हेतुरेकस्त्रिधा स्यात्"॥
इति।।[24]

अमुमेवाभिप्रायं भावप्रकाशकारोऽपि मनुते, तद्यथा -

"कर्मजाः कथिताः केचित् दोषजाः सन्ति चापरे।
कर्मदोषोद्भवश्चान्ये व्याधयः त्रिविधाः स्मृताः"॥
इति॥

तत्र कर्मजा व्याधयः यत् प्राक्तनं दुष्टकर्मभवं केवलभोगनाश्यं प्रायश्चित्तनाश्यं वा।
विविधैः पापकर्मणः भेदैः तत्तद् दुष्कर्मणां कृते प्रायश्चित्तभेदाः सायणाचार्यैः विस्तरेण कर्मविपाकसंहितायां प्रोक्ताः। अतः रोगाणां प्रशमनार्थ तत्तद् पापकर्मणां कृते प्रतिपादितानि प्रायश्चित्तादीनि विधिना कार्याणि भवन्ति ।।
तदुक्तं यथा -

"पापभेदाश्च तत्प्रायश्चित्तभेदाश्च विस्तरात् ।
सायणेनोदिताः कर्मविपाके ग्रन्थ आत्मनः"॥ इति॥[25]

न केवलं प्रायश्चित्तम्। अपि तु रूजः निवृत्यर्थम् अनिवार्यत्वेन कर्त्तव्याणां कार्याणाम् औचित्यमपि स्पष्टयति प्रश्नमार्गकारः।
रोगिणः रोगोपशमनार्थम् औषधं पथ्यमाहारं तैलाभ्यङ्गं सुयोग्यं वासस्थानं श्रद्धया परिकल्पयेत् तत्कृते।
तद्यथा -

"औषधं पथ्यमाहारं तैलाभ्यङ्गं प्रतिश्रयम्।
रोगिभ्यः श्रद्धया दद्याद्रोगी रोगविमुक्तये"॥ इति॥[26]

तत्रैव सर्वरोगविमुक्त्यर्थं मृत्युञ्जयहवनस्याऽपि विधानं वक्ति प्रश्नमार्गकारः।
तद्यथा -

"मृत्युञ्जयहवनं खलु सर्वरूजां विधेयं स्यात्।
सर्वेष्वपि होमेषु ब्राह्मणमुक्तिस्तथाप्तवचः"।। इति॥[27]

कर्मविपाकसंहितायां यानि रोगस्य कारणानि जन्मान्तरीयपापकर्त्रकानि प्रोक्तानि तानि क्रमशः पूर्वोक्त असाध्यरोगाणां विषये निरूप्यते। तत्र प्रथमः रोगः रक्तचापः। तद्रोगहेतुः किञ्च तस्य प्रायश्चित्तं एवम् अस्ति ।
अश्वत्थादिपवित्रवृक्षाणाम् अकारणेन छेदनं कर्तनं वा, गवां वधः रक्तचापस्य कृते जन्मान्तरीयं पापस्य कारणमिति प्रश्नमार्गकारेण कर्मविपाकसंहितोक्तं विषयम् उदाहरिष्यते।
अतः रक्तचापरोगस्य विमुक्तये रक्तवर्णस्य धेनुं पूजयित्वा दानं दद्यात् स धेनुम्।
तदुक्तं यथा -

"अश्वत्थपूर्वोत्तमभूरुहाणां छेदो गवां वा हननं तथैव।
उदाहृतो हेतुरस्रदरस्य प्रदीयतामत्र तु रक्तधेनुः॥"28

पूर्वप्रतिपादितेषु असाध्यरोगेषु द्वितीयः रोग: अस्ति श्वासरोगः । श्वासरोगस्य कारणं प्रायश्चित्तं च ग्रन्थकार: एवं वक्ष्यति -

सभ्यजनानां निन्दया, तातजननीगुरुणां द्वेषेण, अन्नस्यापहरणेन च अयं वातरोग उत श्वास रोगो वा सम्भवति । श्वासरोगस्य परिहारार्थं ताम्रेण निर्मितं मृगप्रतिमां वस्त्रे संस्थाप्य दानं दद्यात्।।

अन्नदानं, सुवर्णदानं, वायुसूक्तजपः वायुप्रशमनकरवायुसम्बन्धी ऋचां जपंश्च विहितः।

तद्यथा -

"निन्दा सभ्यजनेषु तातजननीद्वेषो गुरुद्वेषणम्
चान्नस्यापहृतिः प्रभञ्जनरुजो हेतुश्च तत् शान्तये।29
दद्यात्ताम्रमृगं तथैव वसनं पश्यान्नमष्टापदं
सूक्तं मारुतदैवतं प्रशमनी वायोऋचं वा जपेत् ॥

असाध्यरोगेषु तृतीयः अस्ति हृद्रोगः। यद्यपि हृद्रोगस्य कृते साक्षात्कारणानि नोक्तानि । तद्रोगस्य साम्यं भजन्तं महोदररोगस्य कारणम् अत्र निरुप्यते । गुरुपत्न्या सह गमनदोषवशात् स्त्रियाः गर्भपात करणस्य कारणञ्च हृद्रोगस्य पूर्वजन्मार्जितपापहेतुकौ भवतः। अस्य रोगस्य विमुक्तये रूद्रसूक्तजपं, वारूणि सूक्तजपं, जलदानं सुवर्णेन निर्मितं मकरदानं च विहितमस्ति।

तद्यथा -

"हेतुर्महोदर-गदे गुरुतल्पयानं स्त्रीगर्भपातनमपि प्रजपेच्च सूक्तम्।
रौद्रं च वारुणमपीह जलस्य दानं कार्यं तथा मकरदानमपि प्रशान्त्यै"।।इति ॥30

इदानीं मधुमेहरोगस्य कारणानि परिहारश्च उच्यते । तापस्या गमनवशात्, पशु-कन्या-गुरुपत्नी-विधवादिषु च गमनवशात् गुरुद्वेषवशात्, ब्रह्मस्वापहरणवशात्, धनकनकादीनाम् अपहरणवशात् इतरेभ्यः दुःखप्रदानं च प्रमेहस्य कारणं ब्रूते।

तत्राऽपि सुरामेहरोगस्य कृते मातृगमनं कारणम् इक्षुमेहस्य कृते सहोदरी गमनं कारणमस्ति । मधुमेहस्य कृते भ्रातृस्त्रीगमनं कारणम्। सर्वेषां रोगाणां परिहाराय सर्वरोगनाशकमंत्रहोमो विहितः। सुवर्णदानं, गोदानं, जलदानं, पक्वान्नदानं, वारुणिमंत्रजपपूजादिभिश्च जन्मान्तरेषु कृतस्य दुरितस्य परिहारो भवति। सर्वरोगशान्तिश्चापि सम्भवतीत्यभिप्रायः।

तदुक्तं यथा –

"तापस्याः पशुकन्यका गुरुजनस्त्रीनिर्धनानांगतिः
विद्वेषो गुरुषु द्विजस्य हरणं हेम्नोऽन्यहृत्पीडनम् ॥
एतत्सर्वमिदं प्रमेहकृतिदं मातृस्वभ्रातृश्वश्र
सम्भोगयुतं सुरेक्षु मधुमेहानां क्रमात् कारणम्।
सर्वामयघ्नं हवनं विधेयं, सुवर्णधेन्वोश्च जलस्य दानम्।
पक्वान्नदानं मधुमेहशान्त्यै जपस्तथाऽपि वारुणीनाम्"॥31

**अर्बुदरोगः**

**अर्बुदस्य कारणं एवं मनुते प्रश्नमार्गकारः** - शाकस्य पदार्थानां चौर्यं, इतरेषां वाचि मध्ये गमनं, परेषां वधकर्मणि प्रवृत्तिः, अनुचितस्त्रीगमनादयो अर्बुदरोगस्य कारणानि सन्ति । नाडीव्रणस्य कृते देववृक्षाणां छेदनं कर्तनं वा कारणमस्ति। अर्बुदरोगस्य परिहारार्थं रत्नानां दानं देयम्। एवमेव हस्तार्बुदस्य कृते भ्रूणहत्या कारणमस्ति । अर्बुदरोगस्य अपाकरणाय सर्वत्र द्विजवरेभ्यः यथाशक्तिरत्नदानानि विहितानि।

तद्यथा -

"शाकादिचौर्यं परवाग्विघातो वधः परस्यानुचिताङ्गनाप्तिः।
व्रणेछिदा भूमिरुहस्य नाड़ी व्रणेतु हेतुर्मणिरत्र देयः।।
हस्तोत्थानां भ्रूणहत्या व्रणानां पादोत्थानां स्याद् गुरुस्त्रीगमादिः।
हेतुस्तेषां चोभयेषां प्रशान्त्यै कार्यं शक्त्या रत्नदानं द्विजेभ्यः"॥32

उक्तं च कर्मविपाकप्रायश्चित्तसुधानिधावपि -
तद्यथा -

"विद्रुधेः फलचोरत्वं प्राजापत्यं च निष्कृतिः।
बौधायनोक्तमथवाचाम्रदानं समाचरेत्"।।इति।।33

इत्थं असाध्यरोगाणां लक्षणानि तेषां परिहारोपायश्च इति विषयमधिकृत्य समासतः निरूपणं कृतमिति शम्।

**परिशीलितग्रन्थाः**

1. फलदीपिका
2. प्रश्नमार्गः

3. जातकपारिजातः
4. कर्मविपाकप्रायश्चित्तसुधानिधिः
5. बृहत्पाराशरहोराशास्त्रम्
6. जातकालङ्कारः

**संदर्भ सूची**

1. प्र.मा.अ. 14 श्लो. सं. - 08
2. ब्र.पा.हो.श.अ. 12 श्लो. सं. - 7
3. फ.दी.अ. 14 श्लो. सं. - 02
4. जा.पा.अ. 2 श्लो. सं. - 75
5. प्र.मा.अ. 12 श्लो. सं. - 68
6. जा.प.अ. 2 श्लो. सं. - 76
7. प्र.मा.अ. 12 श्लो. सं. - 69
8. जा.पा.अ. 2 श्लो. सं. - 77
9. प्र.मा.अ. 12 श्लो. सं. - 70
10. जा.पा.अ. 2 श्लो. सं. 78
11. प्र.मा.अ. 12 श्लो. सं. - 80
12. जा.पा.अ. 2 श्लो. सं. - 79
13. प्र.मा.अ. 12 श्लो. सं. - 72
14. जा.पा.अ. 2 श्लो. सं. - 79
15. प्र.मा.अ. 12 श्लो. सं. - 73
16. जा.पा.अ. 2 श्लो. सं. - 80
17. प्र.मा.अ. 12 श्लो. सं. - 74
18. जा.पा.अ. 2 श्लो. सं. - 81
19. जा.पा.अ. 2 श्लो. सं. - 80
20. जा.ल.यो.अ. 3 श्लो. सं. - 13
21. प्र.मा.अ. 13 श्लो. सं. - 29
22. प्र.मा.अ. 13 श्लो. सं. - 25
23. प्र.मा.अ. 13 श्लो. सं. - 26
24. प्र.मा.अ. 13 श्लो. सं. - 30
25. प्र.मा.अ. 13 श्लो. सं. - 33
26. प्र.मा.अ. 13 श्लो. सं. - 35
27. प्र.मा.अ. 13 श्लो. सं. - 36
28. प्र.मा.अ. 23 श्लो. सं. - 24
29. प्र.मा.अ. 23 श्लो. सं. - 15
30. प्र.मा.अ. 23 श्लो. सं. - 19
31. प्र.मा.अ. 23 श्लो. सं. - 17, 18
32. प्र.मा.अ. 23 श्लो. सं. - 29, 30
33. क.वि.प्रा.सु.नि.प्र. 23 श्लो. सं. - 01